[विद्याभवनसंस्कृतग्रन्थमाला ३]

॥ श्रीः ॥

संस्कृतालोकः

(प्रथमः किरणः)

षष्ठकक्षाकृते

रामबालकशास्त्री

चौखम्बाविद्याभवन, चौक, बनारस-१

प्रकाशक—
चौखम्बा विद्या भवन,
चौक, बनारस-१

सं० २०११ वै०
ई० १९५४

मुद्रक—
विद्याविलास प्रेस,
बनारस-१

संस्कृतालोकः

उद्बोधः

सरस्वती श्रुति महती महीयताम् ।
ततः स्नुता ज्ञानसुधा निपीयताम् ॥
सदा मतिः शुभचरिते विधीयताम् ।
रतिः परा परमगुरौ प्रचीयताम् ॥ १ ॥

गावो मधुरा गोपा मधुरा यष्टिर्मधुरा सृष्टिर्मधुरा ।
वलितं मधुरं कलितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥
हृदयं मधुरं गमनं मधुरं वचनं मधुरं चरितं मधुरम् ।
चलितं मधुरं छलितं मधुरं भ्रमितं मधुरं दलितं मधुरम् ॥
अधरं मधुरं वदनं मधुरं नयनं मधुरं वसनं मधुरम् ।
हसितं मधुरं श्वसितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥ २ ॥

मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम् ।
यत्कृपा तमहं वन्दे परमानन्दमाधवम् ॥ ३ ॥

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुः साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः ॥ ४ ॥

नमोऽस्त्वनन्ताय सहस्रमूर्त्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥५॥

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत !
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥ ६ ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥ ७ ॥

प्रकाशक—
चौखम्बा विद्या भवन,
चौक, बनारस-१

सं० २०११ वि०
ई० १९५४

मुद्रक—
विद्याविलास प्रेस,
बनारस-१

संस्कृतालोकः

उद्बोधः

सरस्वती श्रुति महती महीयताम् ।
ततः स्रुता ज्ञानसुधा निपीयताम् ॥
सदा मतिः शुभचरिते विधीयताम् ।
रतिः परा परमगुरौ प्रचीयताम् ॥ १ ॥

गावो मधुरा गोपा मधुरा यष्टिर्मधुरा सृष्टिर्मधुरा ।
वलितं मधुरं कलितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥
हृदयं मधुरं गमनं मधुरं वचनं मधुरं चरितं मधुरम् ।
चलितं मधुरं छलितं मधुरं भ्रमितं मधुरं दलितं मधुरम् ॥
अधरं मधुरं वदनं मधुरं नयनं मधुरं वसनं मधुरम् ।
हसितं मधुरं श्वसितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥ २ ॥

मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम् ।
यत्कृपा तमहं बन्दे परमानन्दमाधवम् ॥ ३ ॥
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुः साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः ॥ ४ ॥

नमोऽस्त्वनन्ताय सहस्रमूर्त्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥५॥

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत !
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥ ६ ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥ ७ ॥

पठति

उपरि = ऊपर । अपि = भी ।

पुरतः = आगे । अपरः = दूसरा ।



उपरि एषः कः ? उपरि एषः पण्डितमहाशयः ।

पुरतः कः ? पुरतः एषः छात्रः ।

एषः छात्रः किम् पठति ? एषः छात्रः पठति ग्रन्थम् ।

एषः अपरः कः ? एषः अपरः अपि छात्रः ।

एषः छात्रः किम् पठति ? एषः छात्रः इतिहासम् पठति

त्वम् किम् पठसि ? अहम् पठामि संस्कृतम् ।

एतौ कौ ?	एतौ छात्रौ ।
एतौ छात्रौ पठतः ?	एतौ छात्रौ पठतः ।
एतौ छात्रौ किम् पठतः ?	एतौ छात्रौ पठतः गणितम् ।
एते के ?	एते बालकाः ।
एते बालकाः किम् पठन्ति ?	एते बालकाः पठन्ति पाठम् ।
युवाम् कौ ?	आवाम् बालकौ ।
यूयम् के ?	वयम् बालकाः ।

वर्तमाने (लट्)


	प्रथमपुरुषे		मध्यमपुरुषे		उत्तमपुरुषे	
ए०	पठ-ति	पठति	पठ-सि	पठसि	पठ-आमि	पठामि
द्वि०	पठ-तः	पठतः	पठ-थः	पठथः	पठ-आवः	पठावः
ब०	पठ-अन्ति	पठन्ति	पठ-थ	पठथ	पठ-आमः	पठामः

प्रथमा विभक्तौ

कर्तरि		एकवचने	द्विवचने	बहुवचने
,,	बालक	बालकः	बालकौ	बालकाः
,,	किम्	कः	कौ	के
,,	युष्मद्	त्वम्	युवाम्	यूयम्
,,	अस्मद्	अहम्	आवाम्	वयम्

एवम् बालकवत् श्याम, राम, नरेन्द्र, नरेश। किम्वत् तत्, एतत्, यत् ।

लिखति



एषः उपरि कः ?	एषः उपरि बालकः ।
एषः बालकः किम् करोति ?	एषः बालकः लिखति ।
एषः बालकः किम् लिखति ?	एषः बालकः कन्वर्गम् लिखति।
अधस्तात् एषः कः ?	अधस्तात् एषः अपि बालकः ।
एषः बालकः किम् करोति ?	एषः बालकः लकारम् लिखति।
एषः अपरः कः ?	एषः अपि बालकः ।
एषः अपरः बालकः लिखति ?	एषः अपरः बालकः लिखति।

एषः बालकः किम् लिखति ?	एषः बालकः लेखम् लिखति।
त्वम् किम् लिखसि ?	अहम् लेखम् लिखामि ।
युवाम् किम् लिखथः ?	आवाम् श्लोकम् लिखावः
यूयम् किम् लिखथ ?	वयम् संस्कृतानुवादम् लिखामः

वर्तमाने (लट्)

	प्रथमपुरुषे		मध्यमपुरुषे		उत्तमपुरुषे	
ए०	लिख-ति	लिखति	लिख-सि	लिखसि	लिख-आमि	लिखामि
द्वि०	लिख-तः	लिखतः	लिख-थः	लिखथः	लिख आवः	लिखावः
ब०	लिख अन्ति	लिखन्ति	लिख-थ	लिखथ	लिख आमः	लिखामः


द्वितीयाविभक्तौ

		एकवचने		द्विवचने		बहुवचने
कर्मणि	बालक अम्	बालकम्	बालक औ	बालकौ	बालक आन्	बालकान्
,,	किम्	कम्		कौ		कान्
,,	युष्मद्	त्वाम्		युवाम्		युष्मान्
,,	अस्मद्	माम्		आवाम्		अस्मान्

एवम् बालकवत् श्याम, राम, नरेन्द्र, नरेश। किमवत तत, एतत, यत—

——⊙——

नमति



एषः कः ?	एषः गुरुदेवः ।
एते के ?	एते बालकाः ।
एते के बालकाः ?	एते बालकाः शिष्याः ।
एते शिष्याः ?	एते शिष्याः नमन्ति ।
एते शिष्याः कं नमन्ति ?	एते शिष्याः गुरुदेवम् नमन्ति
एते शिष्याः केन नमन्ति ?	एते शिष्याः हस्ताभ्याम् नमन्ति
त्वम् गुरुदेवम् नमसि ?	अहम् गुरुदेवम् नमामि ।

युवाम् गुरुदेवम् नमथः ?	आवाम् गुरुदेवम् नमामः ।
यूयम् गुरुदेवम् नमथ ?	वयम् गुरुदेवम् नमामः ।
कः हस्ताभ्याम् नमति ?	अहम् हस्ताभ्याम् नमामि ।
के हस्ताभ्याम् नमन्ति ?	वयम् हस्ताभ्याम् नमामः ।
त्वम् कम् नमसि ?	अहम् गणेशम् महेशम् भैरवम् नमामि ।

वर्तमाने (लट्)

	प्रथमपुरुषे		मध्यमपुरुषे		उत्तमपुरुषे	
ए०	नम-ति	नमति	नम-सि	नमसि	नम-आमि	नमामि
द्वि०	नम-तः	नमतः	नम-थः	नमथः	नम-आवः	नमावः
ब०	नम-अन्ति	नमन्ति	नम-थ	नमथ	नम-आमः	नमामः

तृतीया विभक्तौ

	एकवचने		द्विवचने		बहुवचने	
करणे	बालक-इन	बालकेन	बालक-भ्याम्	बालकाभ्याम्	बालक-भिः	बालकैः
,,	किम्	केन		काभ्याम्		कैः
,,	युष्मद्	त्वया		युवाभ्याम्		युष्माभिः
,,	अस्मद्	मया		आवाभ्याम्		अस्माभिः

पिबति



उपरि एषः कः ?	उपरि एषः वृद्धः ।
वृद्धः किम् करोति ?	वृद्धः पिबति ।
वृद्धः किम् पिबति ?	वृद्धः दुग्धं पिबति ।
अधस्तात् एतौ कौ ?	अधस्तात् एतौ अपि वृद्धौ ।
एतौ वृद्धौ किम् कुरुतः ?	एतौ वृद्धौ अपि पिबतः ।
एतौ वृद्धौ किम् पिबतः ?	एतौ वृद्धौ अपि दुग्धम् पिबतः ।
एते सर्वे के ?	एते सर्वे वृद्धाः ।

एते वृद्धाः किम् कुर्वन्ति ? एते वृद्धाः पिबन्ति ।
त्वम् किम् पिबसि ? अहम् दुग्धम् पिबामि ।
युवाम् किम् पिबथः ? आवाम् दुग्धं पिबावः ।
यूयम् किम् पिबथ ? वयम् दुग्धम् पिबामः ।

अभ्यासाय—एषः कः ? एतौ कौ ? एते के ? एषः वृद्धः किम् पिबति ? एते वृद्धाः किम् पिबन्ति ? त्वम् किम् पिबसि ?

वर्तमाने (लट्)

	प्रथमपुरुषे		मध्यमपुरुषे		उत्तमपुरुषे	
ए०	पा(पिब)-ति	पिबति	पिब-सि	पिबसि	पिब-आमि	पिबामि
द्वि०	पिब-तः	पिबतः	पिब-थः	पिबथः	पिब-आवः	पिबावः
ब०	पिब-अन्ति	पिबन्ति	पिब-थ	पिबथ	पिब-आमः	पिबामः

चतुर्थी विभक्तौ—		एकवचने	द्विवचने	बहुवचने
सम्प्रदाने	बालक (ङे) य	बालकाय	बालकाभ्याम्	बालकेभ्यः
,,	किम्	कस्मै	काभ्याम्	केभ्यः
,,	युष्मद्	तुभ्यम्	युवाभ्याम्	युष्मभ्यम्
,,	अस्मद्	मह्यम्	आवाभ्याम्	अस्मभ्यम्

गच्छति



एषः कः ?	एषः बालकः ।
एषः किम् करोति ?	एषः गच्छति ।
एतौ कौ ?	एतौ बालकौ ।
एतौ किम् कुरुतः ?	एतौ गच्छतः ।
एते के ?	एते बालकाः ।
एते बालकाः किम् कुर्वन्ति ?	एते बालकाः गच्छन्ति ।
त्वम् किम् करोषि ?	अहम् गच्छामि ।

एते कुतः गच्छन्ति ?	एते गृहात् गच्छन्ति।
त्वम् कुतः गच्छसि ?	अहम् गृहात् गच्छामि।
यूयम् कुतः गच्छथ ?	वयम् विद्यालयात् गच्छामि।
एते बालकाः कुतः आगच्छन्ति?	एते बालकाः गृहात् आगच्छन्ति।

अभ्यासाय—एषः कः ? एते के ? एषः कुतः आगच्छति ? एते कुतः आगच्छन्ति ? त्वम् कुतः आगच्छसि ?

वर्तमाने (लट्)


गम (गच्छ)

	प्रथमपुरुषे		मध्यमपुरुषे		उत्तमपुरुषे	
ए०	गच्छ-ति	गच्छति	गच्छ-सि	गच्छसि	गच्छ-मि	गच्छामि
द्वि०	गच्छ-तः	गच्छतः	गच्छ-थः	गच्छथः	गच्छ-आवः	गच्छावः
ब०	गच्छ-अन्ति	गच्छन्ति	गच्छ-थ	गच्छथ	गच्छ-आमः	गच्छामः

पञ्चमी विभक्तौ

		एकवचने		द्विवचने		बहुवचने
अपादने	बालक-अत्	बालकात्	बालक-भ्याम्	बालकाभ्याम्	बालक-भ्यः	बालकेभ्यः
,,	किम्-	कस्मात्		काभ्याम्		केभ्यः
,,	युष्मद्-	त्वत्		युवाभ्याम्		युष्मत्
,,	अस्मद्-	मत्		आवाभ्याम्		अस्मत्

हसन्ति



एषः उपरि कः ?	एषः उपरि बालकः ।
एषः बालकः किम् करोति ?	एषः बालकः हसति ।
अधस्तात् एते के ?	अधस्तात् एते बालकाः ।
एते बालकाः किम् करोति ?	अधस्तात् एते बालकाः हसन्ति ।
उपरि एतत् चित्रम् कस्य ?	उपरि एतत् चित्रम् बालकस्य ।
एते बालकाः किम् कुर्वन्ति ?	एते बालकाः हसन्ति ।
त्वम् हससि ?	अहम् न हसामि ।

एते चित्रे कयोः ? एते चित्रे बालकयोः ।

एतानि चित्राणि केषाम् ? एतानि चित्राणि बालकानाम् ।

त्वम् हससि ? अहम् न हसामि ?

युवाम् हसथः ? आवाम् न हसावः ।

यूयम् हसथ ? वयम् न हसामः ।

अभ्यासार्थ—कः हसति ? के हसन्ति ? त्वम् हससि ? यूयम् हसथ ? एषः कः ? एते के ? एतद् कस्य ?


षष्ठी विभक्तौ

		एकवचने		द्विवचने		बहुवचने
सम्बन्ध	बालक-स्य	बालकस्य	बालक-भ्याम्	बालकाभ्याम्	बालक-नाम्	बालकानाम्
,,	किम्	कस्य		कयोः		केषाम्
,,	युष्मद्	तव		युवयोः		युष्माकम्
,,	अस्मद्	मम		आवयोः		अस्माकम्

वर्तमाने (लट्)

	प्रथमपुरुषे		मध्यमपुरुषे		उत्तमपुरुषे	
ए०	हस-ति	हसति	हस-सि	हससि	हस-मि	हसामि
द्वि०	हस-तः	हसतः	हस-थः	हसथः	हस-आवः	हसावः
ब०	हस-अन्ति	हसन्ति	हस-थ	हसथ	हस-आमः	हसामः

तरति



उपरि एषः कः ? एषः बालकः ।

एषः बालकः किम् करोति ? एषः बालकः तरति ।

अधस्तात् एषः बालकः किं करोति? अधस्तात् एषः बालकः तरति ।

अधस्तात् एतौ बालकौ किं कुरुतः? अधस्तात् एतौ बालकौ तरतः ।

एते के ? एते पुरुषाः ।

एते पुरुषाः किम् कुर्वन्ति ? एते पुरुषाः तरन्ति ।

त्वम् तरसि ? अहम् तरामि ।

युवाम् तरथः ?	आवाम् तरावः ।
यूयम् तरथ ?	वयम् तरामः ।
एतौ कौ ?	एतौ पुरुषौ ।
एतौ पुरुषौ किम् कुरुतः ?	एतौ पुरुषौ तरतः ।


अभ्यासाय—अयम् कः ? एते किम् कुर्वन्ति ? के तरन्ति ?

	प्रथमपुरुषे		मध्यमपुरुषे		उत्तमपुरुषे	
ए०	तर-ति	तरति	तर-सि	तरसि	तर-अमि	तरामि
द्वि०	तर-तः	तरतः	तर-थः	तरथः	तर-आवः	तरावः
ब०	तर-अन्ति	तरन्ति	तर-थ	तरथ	तर-आमः	तरामः

सप्तमी विभक्तौ

		एकवचने		द्विवचने		बहुवचने
अधिकरणे	बालक-इ	बालके	बालक-योः	बालकयोः	बालक-सु	बालकेषु
,,	किम्	कस्मिन्		कयोः		केषु
,,	युष्मद्	त्वयि		युवयोः		युष्मासु
,,	अस्मद्	मयि		आवयोः		अस्मासु

कर्षति



नरेशः—भो महेश ! चित्रे उपरि यः कर्षति, सः कः ?

महेशः—चित्रे उपरि एषः हरिः कर्षति ।

नरेशः—हरिः कर्षति वा पठति ?

महेशः—न पठति, हरिः अपठत् । अधुना कर्षति

नरेशः—त्वम् अपि अपठः ? शिशुः अपि अपठत् ?

महेशः—अहम् अपि अपठम् । शिशुः अपि अपठत् ।

नरेशः—अधस्तात् एतौ कौ ?

महेशः—एतौ रविः शशिः च ।

नरेशः—एतौ अपि अपठताम् ?

महेशः—वयम् सर्वे अपठाम ।

नरेशः—यूयम् सर्वे अपठत ?

महेशः—वयम् सर्वे अपठाम, एते सर्वे अपठन् ।

नरेशः—एते किम् कुर्वन्ति ?

अधुना एते स्वक्षेत्रे हलम् कर्षन्ति

महेशः—अहो कीदृशाः वृषभाः ? धन्यः त्वम्, धन्याः च एते सर्वे ।

महेशः—भो एते ते बालकाः हलम् कर्षन्ति, ये विद्यालये पठन्ति ।

नरेशः—महेश ! ये विद्यालये अपठन्, ते एव हलम् कर्षन्ति ?

अभ्यासाय—कः अपठत् ? के अपठन् ? त्वम् अपठः ? यूयम् अपठत ?

अनद्यतने लङ्

	प्रथमपुरुषे	मध्यमपुरुषे	उत्तमपुरुषे
ए०	अपठत्	अपठः	अपठम्
द्वि०	अपठताम्	अपठतम्	अपठाव
ब०	अपठन्	अपठत	अपठाम


प्रथमा विभक्तौ

		एकवचन	द्विवचन	बहुवचन
कर्त्तरि	हरि	हरिः	हरी	हरयः
,,	शिशु	शिशुः	शिशू	शिशवः

खेलति

नरेन्द्रः—श्याम ! रामः हरिणा सह खेलति । त्वम् कथम् न खेलसि ? त्वम् अपि खेल ।

श्यामः—अहम् पूर्वम् एव अखेलम् विधुना सह ।



नरेन्द्रः—विधुः पूर्वम् एव अखेलत् ?

श्यामः—एवम्, विधुः पूर्वम् एव अखेलत् ।

नरेन्द्रः—तदा विधुः खेलतु रामेण सह ।

श्यामः—विधुः, कृष्णः, माधवः च सर्वे अखेलन् ।

नरेन्द्रः—अहम् खेलामि एतैः सह ।

बालकाः—भोः वयम् खेलामः ।

नरेन्द्रः—सुरेन्द्रदेव, अस्माभिः सह आगच्छ ।

कः खेलतु ? त्वम् न खेल, यूयम् खेलत ।

अहम् किम् करोमि ? के खेलन्तु ? सः किम् करोतु ?

अभ्यासाय—कः खेलतुः ? के न खेलन्तु ?

आज्ञायाम् (लोट्)


	प्रथमपुरुषे		मध्यमपुरुषे		उत्तमपुरुषे	
ए०	खेल–तु	खेलतु	खेल–हि	खेल	खेल–आ-नि	खेलानि
द्वि०	खेल-ताम्	खेलताम्	खेल-तम्	खेलतम्	खेल-आवः	खेलावः
ब०	खेल-अन्तु	खेलन्तु	खेल-त	खेलत	खेल-आमः	खेलामः

गृहम्

एतत् रमेशस्य गृहचित्रम्। तस्य गृहम् भव्यम् इति चित्रेण अनुभवामि। रमेशः एकः संयतः छात्रः। सः प्रतिदिनं प्रातः चतुर्वादने शयनम् त्यजति। क्षणम् ईश्वरम् स्मरति। ततः स्वल्पम् जलम् पिबति। तदनु शौचालयम् गच्छति। शौचानन्तरम् शुद्धमृत्तिकया जलेन हस्तौ धावति, मुखम् च दन्तधावनेन। नद्याम् कूपे नले वा मज्जति। अङ्गोञ्छेण शरीरम् प्रोञ्छति। सम्यक् कुशासने काष्ठासने ऊर्णासने वा पद्मासनेन उपविशति। पञ्चपात्रस्य जलेन आचामति। सन्ध्यागतान् ऋषीन् ध्यायति। मन्त्रम् जपति। गीताम् गायति। रामचरितमानसम् पठति। ततः अङ्कुरितम् चणकम् स्वल्पम् खादति। पुनः गोदुग्धम् पिबति। एतदनन्तरम् सप्तवादनात् नववादनम् यावत् पठितान् विषयान् अभ्यस्यति। पुनः प्रसन्नवदनः महानसे खादति। पश्चात् अङ्गरक्षावस्त्रम् शरीरे, पठनसामग्रीम् च झोल्याम् धरति। ततः सावधानः विद्यालयम् गच्छति। मार्गे कुत्रापि न विरमति। केनापि सह न आलपति। अपराह्णे चतुर्वादने विद्यालयात् गृहम् आगच्छति। यथास्थानम् पुस्तकादि धरति। शौचादिना निवृत्तः जलपानम् करोति। पुनः खेलनाय खेलाभूमिम् गच्छति। षट् वादने गृहम् आगच्छति। समाचारपत्रम् पठति। पुनः सप्तवादने खादति। सार्द्धसप्तवादनात् सार्द्धनववादनम् यावत् पठितपाठम् पठति। दश वादने शयनम् गच्छति। एतेन क्रमेण रमेशः योग्यः छात्रः प्रसिध्यति।

अभ्यासाय—एतत् कस्य गृहस्य चित्रम्? रमेशः कदा शयनम् त्यजति? रमेशस्य कीदृशः पठनक्रमः? कदा खादति? केन प्रकारेण सः विद्यालयम् गच्छति? कति वादने आगच्छति?

खनति



विधुः—हरे! एतत् अस्माकम् विद्यालयस्य क्षेत्रम्।

हरिः—विधो! एते किम् कुर्वन्ति?

विधुः—एते खनन्ति क्षेत्रम् बीजवपनाय।

हरिः—एतेषाम् हस्ते किम् ?

विधुः—एतेषाम् हस्ते कुदारम् ।

हरिः—अहम् अपि इच्छामि खननम् ।

विधुः—पूर्वम् अहम् खनिष्यामि पश्चात् त्वम् खनिष्यसि ।

हरिः—साधु, त्वम् खन ।

हरिः—श्यामः मया सह खनिष्यति ?

विधुः—त्वया सह श्यामः खनिष्यति । मया सह सर्वे बालकाः खनिष्यन्ति ।

अभ्यासाय—कः खनिष्यति ? के खनिष्यन्ति ? त्वम् किम् खनिष्यसि ? यूयम् खनिष्यथ ? एतत् कस्य क्षेत्रम् ?

भविस्यति (लृट्)

	प्रथमपुरुषे		मध्यमपुरुषे		उत्तमपुरुषे	
ए०	खन् इ ष्य ति	खनिष्यति	खन् इ ष्य सि	खनिष्यसि	खन् इ ष्य आमि	खनिष्यामि
द्वि०	खन् इ ष्य तः	खनिष्यतः	खन् इ ष्य थः	खनिष्यथः	खन् इ ष्य आवः	खनिष्यावः
ब०	खन्इष्यअन्ति	खनिष्यन्ति	खन् इ ष्य थ	खनिष्यथ	खन् इ ष्य आमः	खनिष्यामः

---o---

सीव्यति

श्रीशः—गिरीश ! चित्रे एषा का ? गिरीशः—एषा बालिका ।

श्रीशः—बालिकायाः किम् नाम ? गिरीशः—बालिकायाः नाम रमा ।

श्रीशः—एषा रमा ? गिरीशः—श्रीश ! एषा रमा ।

श्रीशः—रमा किम् करोति ? गिरीशः—रमा सीव्यति वस्त्रम् ।

श्रीशः—एते अपरे के ? गिरीशः—एते अपरे सीता गीता च ।



श्रीशः—एताः सर्वाः सीव्यन्ति वस्त्रम् । गिरीशः—मनोरमा अपि सीव्येत् धौतम् ।

श्रीशः—गिरीशः त्वम् अपि सीव्येः वस्त्रम् । गिरीशः—अहम् अपि सीव्येयम् वस्त्रम् ।

श्रीशः—यूयम् सर्वे सीव्येत वस्त्रम् ? गिरीशः—वयम् सर्वे सीव्येम ।

अभ्यासाय—का सीव्येत् ? त्वम् किम् सीव्येः ? वयम् किम् सीव्येम? एषा का ? एषा किम् सीव्यति ?

विधौ लिङ्

	प्रथमपुरुषे	मध्यमपुरुषे	उत्तमपुरुषे
ए०	सीव्येत्	सीव्येः	सीव्येयम्
द्वि०	सीव्येताम्	सीव्येतम्	सीव्येव
ब०	सीव्येयुः	सीव्येत	सीव्येम

कुट्टति



गीता—चित्रे उपरि एषा का ?

सीता—गीते ! चित्रे उपरि एषा मम भगिनी ।

गीता—हं हो सीते ! तव भगिनी गोमती ?

सीता—अथ किम् ? एषा मम भगिनी गोमती या मूसलेन धान्यं कुट्टति ओखल्याम् ।

गीता—एते अपरे के ?

सीता—एते अपरे रामस्य पुत्री दमयन्ती श्यामस्य जननी गौरी ।

गीता—एते अपि कुट्टतः धान्यम् ?

सीता—त्वम् अपि कुट्टसि धान्यम् ?

गीता—अहम् अपि कुट्टामि धान्यम् ।

सीता—वयम् सर्वा अपि कुट्टामः धान्यम् ।

गीता—यूयम् सर्वा कुट्टथ धान्यम् ?

सीता—वयम् सर्वा अपि कुट्टामः धान्यम् ।

अभ्यासाय—एषा कस्य भगिनी ? एषा दमयन्ती कस्य पुत्री ? एषा गौरी कस्य जननी ? त्वम् कस्य भगिनी ? तव का जननी ?

नीतिः

चक्षुषा मनसा वाचा कर्मणा च चतुर्विधम् ।
प्रसादयति यो लोकं तं लोकोऽनुप्रसीदति ॥ १ ॥
धर्ममाचरतो राज्ञः सद्भिश्चरितमादितः ।
वसुधा वसुसम्पूर्णा वर्धते भूतिवर्धिनी ॥ २ ॥
अथ सन्त्यजतो धर्ममधर्मं चानुतिष्ठतः ।
प्रतिसंवेष्टते भूमिरग्नौ चर्माहितं यथा ॥ ३ ॥
य एव यत्नः क्रियते परराष्ट्रविमर्दने ।
स एव यत्नः कर्त्तव्यः स्वराष्ट्रपरिपालने ॥ ४ ॥
धर्मेण राज्यं विन्देत धर्मेण परिपालयेत् ।
धर्ममूलां श्रियं प्राप्य न जहाति न हीयते ॥ ५ ॥
गावः गन्धेन पश्यन्ति वेदैः पश्यन्ति ब्राह्मणाः ।
चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः ॥ ६ ॥
पर्जन्यनाथा पशवो राजानो मन्त्रिबान्धवाः ।
पतयो बान्धवाः स्त्रीणां ब्राह्मणा वेदबान्धवाः ॥ ७ ॥
सत्येन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते ।
मृज्यया रक्ष्यते रूपं कुलं वृत्तेन रक्ष्यते ॥ ८ ॥
न कुलं वृत्तहीनस्य प्रमाणमिति मे मतिः ।
अन्तेष्वपि हि जातानां वृत्तमेव विशिष्यते ॥ ९ ॥
विद्यामदो धनमदस्तृतीयोऽभिजनो मदः ।
मदा एतेऽवलिप्तानामेत एव सतां दमाः ॥१०॥

शब्दरूपावली

	कर्त्तरि (कर्त्ता)			कर्मणि		
	ए० व०	द्वि० व०	ब० व०	ए० व०	द्वि० व०	ब० व०
बालक	बालकः	बालकौ	बालकाः	बालकम्	बालकौ	बालकान्
हरि	हरिः	हरी	हरयः	हरिम्	हरी	हरीन्
शिशु	शिशुः	शिशू	शिशवः	शिशुम्	शिशू	शिशून्
बालिका	बालिका	बालिके	बालिकाः	बालिकाम्	बालिके	बालिकाः
मति	मतिः	मती	मतयः	मतिम्	मती	मतीः
नदी	नदी	नद्यौ	नद्यः	नदीम्	नद्यौ	नदीः
पुस्तक	पुस्तकम्	पुस्तके	पुस्तकानि	पुस्तकम्	पुस्तके	पुस्तकानि
वारि	वारि	वारिणी	वारीणि	वारि	वारिणी	वारीणि
पयस्	पयः	पयसी	पयांसि	पयः	पयसी	पयांसि
तत्	सः	तौ	ते	तम्	तौ	तान्
एतत्	एषः	एतौ	एते	एतम्	एतौ	एतान्
यत्	यः	यौ	ये	यम्	यौ	यान्
किम्	कः	कौ	के	कम्	कौ	कान्
युष्मद्	त्वम्	युवाम्	यूयम्	त्वाम्	युवाम्	युष्मान्
अस्मद्	अहम्	आवाम्	वयम्	माम्	आवाम्	अस्मान्

धातुरूपावली

वर्तमाने लट् (वर्तमानकालमें)

	प्रथमपुरुषे			मध्यमपुरुषे		
	ए० व०	द्वि० व०	ब० व०	ए० व०	द्वि० व०	ब० व०
पठ	पठति	पठतः	पठन्ति	पठसि	पठथः	पठथ
गम्	गच्छति	गच्छतः	गच्छन्ति	गच्छसि	गच्छथः	गच्छथ
कृ	करोति	कुरुतः	कुर्वन्ति	करोषि	कुरुथः	कुरुथ

भविष्यति लृट् (भविष्यत् कालमें)

प्रथमपुरुषे			मध्यमपुरुषे		
ए० व०	द्वि० व०	ब० व०	ए० व०	द्वि० व०	ब० व०
पठिष्यति	पठिष्यतः	पठिष्यन्ति	पठिष्यसि	पठिष्यथः	पठिष्यथ
गमिष्यति	गमिष्यतः	गमिष्यन्ति	गमिष्यसि	गमिष्यथः	गमिष्यथ
करिष्यति	करिष्यतः	करिष्यन्ति	करिष्यसि	करिष्यथः	करिष्यथ

करणे			सम्प्रदाने		
ए० व०	द्वि० व०	ब० व०	ए० व०	द्वि० व०	ब० व०
बालकेन	बालकाभ्याम्	बालकैः	बालकाय	बालकाभ्याम्	बालकेभ्यः
हरिणा	हरिभ्याम्	हरिभिः	हरये	हरिभ्याम्	हरिभ्यः
शिशुना	शिशुभ्याम्	शिशुभिः	शिशवे	शिशुभ्याम्	शिशुभ्यः
बालिकया	बालिकाभ्याम्	बालिकाभिः	बालिकायै	बालिकाभ्याम्	बालिकाभ्यः
मत्या	मतिभ्याम्	मतिभिः	मत्यै	मतिभ्याम्	मतिभ्यः
नद्या	नदीभ्याम्	नदीभिः	नद्यै	नदीभ्याम्	नदीभ्यः
पुस्तकेन	पुस्तकाभ्याम्	पुस्तकैः	पुस्तकाय	पुस्तकाभ्याम्	पुस्तकेभ्य
वारिणा	वारिभ्याम्	वारिभिः	वारिणे	वारिभ्याम्	वारिभ्यः
पयसा	पयोभ्याम्	पयोभिः	पयसे	पयोभ्याम्	पयोभ्यः
तेन	ताभ्याम्	तैः	तस्मै	ताभ्याम्	तेभ्यः
एतेन	एताभ्याम्	एतैः	एतस्मै	एताभ्याम्	एतेभ्यः
येन	याभ्याम्	यैः	यस्मै	याभ्याम्	येभ्यः
केन	काभ्याम्	कैः	कस्मै	काभ्याम्	केभ्यः
त्वया	युवाभ्याम्	युष्माभिः	तुभ्यम्	युवाभ्याम्	युष्मभ्यम्
मया	आवाभ्याम्	अस्माभिः	मह्यम्	आवाभ्याम्	अस्म

उत्तमपुरुषे

ए० व०	द्वि० व०	ब० व०
पठामि	पठावः	पठामः
गच्छामि	गच्छावः	गच्छामः
करोमि	कुर्वः	कुर्मः

उत्तमपुरुषे

ए० व०	द्वि० व०	ब० व०
पठिष्यामि	पठिष्यावः	पठिष्यामः
गमिष्यामि	गमिष्यावः	गमिष्याम
करिष्यामि	करिष्यावः	करिष्यामः

अपादाने			सम्बन्धे		
ए० व०	द्वि० व०	ब० व०	ए० व०	द्वि० व०	ब० व०
बालकात्	बालकाभ्याम्	बालकेभ्यः	बालकस्य	बालकयोः	बालकानाम्
हरेः	हरिभ्याम्	हरिभ्यः	हरेः	हर्योः	हरीणाम्
शिशोः	शिशुभ्याम्	शिशुभ्यः	शिशोः	शिश्वोः	शिशूनाम्
बालिकायाः	बालिकाभ्याम्	बालिकाभ्यः	बालिकायाः	बालिकयोः	बालिकानाम्
मत्या, मतेः	मतिभ्याम्	मतिभ्यः	मत्याः मतेः	मत्योः	मतीनाम्
नद्याः	नदीभ्याम्	नदीभ्यः	नद्याः	नद्योः	नदीनाम्
पुस्तकात्	पुस्तकाभ्याम्	पुस्तकेभ्यः	पुस्तकस्य	पुस्तकयोः	पुस्तकानाम्
वारिणः	वारिभ्याम्	वारिभ्यः	वारिणः	वारिणोः	वारिणाम्
तस्मात्	ताभ्याम्	तेभ्यः	तस्य	तयोः	तेषाम्
एतस्मात्	एताभ्याम्	एतेभ्यः	एतस्य	एतयोः	एतेषाम्
यस्मात्	याभ्याम्	येभ्यः	यस्य	ययोः	येषाम्
कस्मात्	काभ्याम्	केभ्यः	कस्य	कयोः	केषाम्
त्वत्	युवाभ्याम्	युस्मत्	तव	युवयोः	युष्माकम्
मत्	आवाभ्याम्	अस्मत्	मम	आवयोः	अस्माकम्

अनद्यतने लङ् (सामान्य भूत काल में)

प्रथमपुरुषे			मध्यपुरुषे		
ए० व०	द्वि० व०	ब० व०	ए० व०	द्वि० व०	ब० व०
अपठत्	अपठताम्	अपठन्	अपठः	अपठतम्	अपठत
अगच्छत्	अगच्छताम्	अगच्छन्	अगच्छः	अगच्छतम्	अगच्छत
अकरोत्	अकुरुताम्	अकुर्वन्	अकरोः	अकुरुतम्	अकुरुत

आज्ञायाम् लोट् (आज्ञामें)

प्रथमपुरुषे			मध्यमपुरुषे			उत्तमपुरुषे		
ए० व०	द्वि० व०	ब० व०	ए० व०	द्वि० व०	ब० व०	ए० व०	द्वि० व०	ब० व०
पठतु	पठताम्	पठन्तु	पठ	पठतम्	पठत	पठानि	पठाव	पठाम
गच्छतु	गच्छताम्	गच्छन्तु	गच्छ	गच्छतम्	गच्छत	गच्छानि	गच्छाव	गच्छाम
करोतु	कुरुताम्	कुर्वन्तु	कुरु	कुरुतम्	कुरुत	करवाणि	करवाव	करवाम

अधिकरणे			सम्बोधने		
ए० व०	द्वि० व०	ब० व०	ए० व०	द्वि० व०	ब० व०
बालके	बालकयोः	बालकेषु	हे बालक	हे बालकौ	हे बालकाः
हरौ	हर्योः	हरिषु	" हरे	" हरी	" हरयः
शिशौ	शिश्वोः	शिशुषु	" शिशो	" शिशू	" शिशवः
बालिकायाम्	बालिकयोः	बालिकासु	" बालिके	" बालिके	" बालिकाः
मत्याम् मतौ	मत्योः	मतिषु	" मते	" मती	" मतयः
नद्याम्	नद्योः	नदीषु	" नदि	" नद्यौ	" नद्यः
पुस्तके	पुस्तकयोः	पुस्तकेषु	" पुस्तक	" पुस्तके	" पुस्तकानि
वारिणि	वारिणोः	वारिषु	" वारे वारि	" वारिणी	" वारीणि
पयसि	पयसोः	पयस्सु	" पयः	" पयसी	" पयांसि
तस्मिन्	तयोः	तेषु	×	×	×
एतस्मिन्	एतयोः	एतेषु	×	×	×
यस्मिन्	ययोः	येषु	×	×	×
कस्मिन्	कयोः	केषु	×	×	×
त्वयि	युवयोः	युष्मासु	×	×	×
मयि	आवयोः	अस्मासु	×	×	×

उत्तमपुरुषे

ए० व०	द्वि०	व० व०
अपठम्	अपठाव	अपठाम
अगच्छम्	अगच्छाव	अगच्छाम
अकरवम्	अकुर्व	अकुर्म

विधौ लिङ् (आदरप्रदर्शनमें)

प्रथमपुरुषे			मध्यमपुरुषे			उत्तमपुरुषे		
ए०व०	द्वि० व०	ब० व०	ए०व०	द्वि० व०	ब० व०	ए०व०	द्वि०व०	ब० व०
पठेत्	पठेताम्	पठेयुः	पठेः	पठेतम्	पठेत	पठेयम्	पठेव	पठेम
गच्छेत्	गच्छेताम्	गच्छेयुः	गच्छेः	गच्छेतम्	गच्छेत	गच्छेयम्	गच्छेव	गच्छेम
कुर्यात्	कुर्याताम्	कुर्युः	कुर्याः	कुर्यातम्	कुर्यात	कुर्याम्	कुर्याव	कुर्याम

संस्कृत में अनुवाद कीजिये

(पठति पृ. २)

यह कौन ? ऊपर यह कौन ?
आगे कौन ? आगे एक छात्र ।
यह क्या पढ़ता है ?
यह छात्र क्या पढ़ता है ? यह दूसरा कौन ?
यह दूसरा क्या पढ़ता है ? तू क्या पढ़ता है ?
मैं इतिहास पढ़ता हूं । ये दोनों कौन ?
ये दोनों छात्र । ये दोनों छात्र क्या पढ़ते हैं ?

(लिखति पृ. ४)

यह ऊपर कौन ? ऊपर यह बालक ।
यह बालक क्या करता है ?
यह बालक लिखता है ।
नीचे यह कौन ? नीचे यह भी लड़का ।
दूसरा यह लड़का । यह दूसरा कौन ?
यह लड़का क्या लिखता है ?
तू क्या लिखता है । वे दोनों क्या लिखते हैं ?
हम लोग संस्कृत लिखते हैं ।

(नमति पृ. ६)

यह कौन ? ये कौन ? यह लड़का ।
ये शिष्य ? ये शिष्य प्रणाम करते हैं ।
ये शिष्य किसको नमस्कार करते हैं ।
मैं गुरुदेव को प्रणाम करता हूं ।
तुम दोनों किसे प्रणाम करते हो ?
हम दोनों गुरुदेव को प्रणाम करते हैं ।
तू किसे प्रणाम करता है ।
हम लोग गुरुदेव को प्रणाम करते हैं ।

(पिबति पृ. ८)

वृद्ध क्या करता है ? वृद्ध पीता है ।
वृद्ध क्या पीता है ? वृद्ध दूध पीता है ।
ये दोनों भी पीते हैं । ये दोनों कौन ?
नीचे ये दोनों कौन ? ये दोनों वृद्ध क्या पीते हैं ?
ये दोनों वृद्ध दूध पीते हैं । ये सब पीते हैं ।

(गच्छति पृ. १०)

यह क्या करता है ? यह जाता है ।
ये दोनों कौन ? ये दोनों लड़के ।
ये लड़के क्या करते हैं ? ये लड़के जाते हैं ।
तू क्या करता है ? मैं जाता हूं ।
यह कहाँ से आता है ? यह घर से आता है ।

(हसति पृ. १२)

यह ऊपर कौन ? ऊपर यह लड़का ।
यह लड़का क्या करता है ?
यह लड़का हँसता है । नीचे ये कौन ?
नीचे ये लड़के हँसते हैं ।
यह चित्र किसका ? ये लड़के क्या करते हैं ?
तू हंसता है । तू क्या करता है ?

(तरति पृ. १४)

यह कौन ? यह लड़का तैरता है ।

यह लड़का क्या करता है ?
यह लड़का तैरता है । ये कौन ?
ये पुरुष तैरते हैं । तू तैरता है ? मैं तैरता हूं ।
ये पुरुष तैरते हैं । हम लोग तैरते हैं ।
तुम लोग तैरते हो । वे दोनों तैरते हैं ।

(कर्षति पृ. १९)

ऊपर चित्र में जो जोतता है वह कौन ?
चित्र में ऊपर हरि जोतता है ।
हरि जोतता है या पढ़ता है ?
पढ़ता नहीं । पढ़ चुका है ।
तूने भी पढ़ा है ? मैंने भी पढ़ा है ।
चित्र में हरि क्या करता है ?
तुम लोग जोतते हो । मैं जोतता हूं ।

(खेलति पृ. १८)

श्याम ! राम किसके साथ खेलता है ?
तू किसके साथ खेलता है ?
मैं किसके साथ खेलता हूं ?
वह किसके साथ खेलता है ?
हम लोग उसके साथ खेलते हैं ।
विभु राम के साथ खेले । वह खेले ।
हम लोग खेलें ? तुम लोग खेलो ।

(गृहम् पृ. २०)

यह किसके घर का चित्र है ?
रमेश कब उठता है ?
वह किसका स्मरण करता है ?
वह नदी में नहाता है कि कूएं पर ?
मैं काष्ठासन पर बैठता हूं ।
वह समाचार पत्र पढ़ता है ।
मैं दस बजे स्कूल जाता हूं ।
वे लड़के कब स्कूल जाते हैं ?

(खनति पृ. २१)

ये क्या करते हैं ? ये खेत कोड़ते हैं ।
इनके हाथ में क्या है ?
तुम्हारे हाथ में कुछ नहीं है ।
मेरे हाथ में लाठी है ।
तुम खेत जोतो, मैं खेत कोड़ता हूं ।
वह मेरे साथ खोदेगा ।

(सीव्यति पृ. २२)

गिरीश ! यह चित्र में क्या ? यह बालिका ।
यह कौन बालिका ? यह रमा ।
रमा कपड़ा सीती है ।
ये दूसरी सीता और गीता हैं ।
ये सब कपड़ा सीती हैं ।

(कुट्टति पृ. २४)

चित्र में यह कौन ? चित्र में यह मेरी बहिन ।
तुम्हारी बहिन गोमती ?
गोमती मूसल से धान कूटती है ।
तू भी धान कूटती है ? मैं भी धान कूटती हूं ।
वे सभी धान कूटती हैं ।